संस्कृतवार्ता:

दिनाङ्क :-08.10.2024

प्रात: - 06:55

## मतगणना

जम्मूकश्मीर-हरियाणा-राज्ययो: जातस्य विधानसभा-निर्वाचनस्य मतगणना अद्य आरभ्यते। मतगणना प्रात: अष्टवादनत: समारप्स्यते । परिणामा: मध्याह्ने द्वादशवादने आयास्यति इति सम्भाव्यते। सर्वप्रथमं प्रैष्यमतपत्राणां गणना कारयिष्यते। मतगणना-प्रक्रियां सुचारूविधिना प्रचालयितुं निर्वाचनायोगेन व्यापकप्रबन्धनानि विहितानि। आयोगेन स्वीये आन्तर्जालिके www.eci.gov.in इत्यत्र परिणामानां प्रचारप्रसाराय एका आधारभूत- सरंचना निर्मिता । अवधेयं वर्तते यत् जम्मू-कश्मीरराज्ये नवति: नैर्वाचनिक-क्षेत्रेभ्य: सितम्बरमासस्य अष्टादश पञ्चविंशति अपि च अस्य मासस्य प्रथमे दिनाङ्के च मतदानं जातम्। तत्रैव हरियाणाराज्ये नवति: विधानसभाक्षेत्रेभ्य: मतदानं मासस्यास्य पञ्चमे दिनाङ्के सम्पादितम्।

## राष्ट्रपति:-मोइज्जू:

राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीपधनखड़: च ह्य: नवदिल्लां मालदीवदेशीयेन राष्ट्रपतिना डॉ. मोहम्मद-मोइज्जू इत्यनेन साकं संवादं मेलनं च कृतवन्तौ। मोइज्जूइत्यस्य सम्माने भोज: अपि आयोजित: राष्ट्रपतिना । उभौ नेतारौ भारत-मालदीव-देशयो: द्विपक्षीयसम्बन्धान् समीक्षितवन्तौ। राष्ट्रपति: न्यगादीत् यत् प्रतिवेशिप्रथम: लक्ष्यसागर: च इत्यनयो: नीत्यो: अन्तर्गतं मालदीवदेश: एक: महत्वपूर्ण: सहभागी वर्तते।

## राष्ट्रियचलच्चित्र-पुरस्कार

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य नवदिल्ल्यां द्वाविंशत्यधिक-द्विसहस्रतम-वर्षस्य सप्ततितमं राष्ट्रिय-चलच्चित्र-पुरस्कारं प्रदास्यति।

अत्रावसरे प्रख्यात: अभिनेता मिथुनचक्रवर्ती चलच्चित्रक्षेत्रे सर्वोच्चसम्मानेन दादा-साहब-फाल्के-पुरस्कारेण सम्मानितो भविष्यति । ऋषभशेट्टीइत्येष: कन्तारा-चलचित्राय सर्वश्रेष्ठ-अभिनेतु: पुरस्कारेण सम्मानं प्राप्स्यति। सर्वश्रेष्ठ-अभिनेत्र्या: पुरस्कार: तमिलचलच्चित्रस्य थिरूचित्राम्बलम्-इत्यस्य निथ्या-मेनन-इत्यस्यै प्रदास्यते सहैव गुजराती-चलच्चित्रस्य कच्छएक्सप्रेसइत्यस्मै मानसीपारेख: अपि सर्वश्रेष्ठ-अभिनेत्र्या: पुरस्कारेण सम्मानिता भविष्यति। तत्रैव, सङ्गीतश्रेण्यां सर्वश्रेष्ठ-पुरूष-पार्श्वगायकस्य पुरस्कार: अरिजीत-सिंहइत्यस्मै प्रदास्यते।

<u>जोशी-ऊर्जा</u>

केन्द्रीय-नवीन-नवीकरणीयोर्जा-मन्त्री प्रह्लादजोशी प्रावोचत् यत् त्रिंशदधिक-द्विसहस्रतमवर्षं यावत् भारतस्य शीर्षेषु दश-जलपोत-निर्माणदेशेषु अपि च सप्तचत्वारिंशदधिक द्विसहस्रतमवर्षपर्यन्तं शीर्षेषु पञ्चदेशेषु समाविष्टुं लक्ष्यमस्ति। ह्य: जर्मनीदेशे हैम्बर्ग-स्थिरतासम्मेलने भाषमाण: केन्द्रीयमन्त्री नवीनकरणीयोर्जाक्षेत्रे भारतस्य प्रगतिं प्रकाशितवान्।

<u>अन्ताराष्ट्रीयदूरसञ्चारसङ्घ:</u>

भारतम् अस्य मासस्य चतुर्दशदिनांकत: चतुर्विंशति- दिनाङ्कपर्यन्तं नवदिल्ल्यां अन्ताराष्ट्रीयदूरसञ्चारसङ्घस्य विश्व-दूर-संचार-मानकीकरण-सभाया: आतिथ्यं विधास्यति। प्रथमवारमिदम् आयोजनं एशियाप्रशान्तक्षेत्रे आयोजयिष्यते। कार्यक्रमेऽस्मिन् त्रिसहस्राधिकं विश्वनेतारं भागं भजिष्यन्ति। नवत्यधिकैकशतं देशा: प्रौद्योगिक-विशेषज्ञा: अपि कार्यक्रमे सहभागितां सहयोगं च करिष्यन्ति।

।।इति वार्ता:।।